Roll No. : | | | | | | | |     Code-122

# DAV PUBLIC SCHOOLS, ODISHA ZONE-1

## SECOND PERIODIC TEST- 2017

- Check that this question paper contains 10 printed pages
- Set number given on the right hand side of the question paper should be written on the title page of the answer book by the candidate.
- Check that this question paper contains 16 questions.
- Write down the Serial Number of the question before attempting it.
- 15 minutes cooling time has been allotted to read this question paper only and do not write any answer on the answer book during this period.

## CLASS-IX

## SUB : SANSKRIT

**Time : 3 Hrs**     **Maximum Marks : 80**

***General Instructions***

(i) खण्ड : क : – अपठित — अबवोधनम् —10 अङ्का:

(ii) खण्ड : ख: – रचनात्मक कार्यम् —15 अङ्का:

(iii) खण्ड : ग: – अनुप्रयुक्त व्याकरणम् — 25 अङ्का:

(iv) खण्ड : घ: - पठित अवबोधनम् — 30 अङ्का:

**निर्देशा:**

(i) अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति ।

The question paper has four sections.

(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।

The answers to each section must be written at one place.

(iii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।

Write the question Number according to the question paper.

(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।

Answer all the questions in Sanskrit.



57

## खण्डः – क

### अपठित – अबवोधनम्

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्त प्रश्नान् संस्कृतेन उत्तरत —

प्रात:कालस्य समय: अतीव आकर्षक: भवति । निशाया: कालिमा सूर्योदयेन लालिम्नि परिवर्तते। तदा एव वृक्षाणाम् पत्रेभ्य: निर्गत्य सूर्यस्य किरणा: संसारे प्रकाशं प्रसारयन्ति । आकाशे खगा: कलरवं कृत्वा मधुरेण संगीतेन वातावरणं मादकं कुर्वन्ति । तेषा मधुरं कूजनं मन: मोहितं करोति । हरित – हरित –घासे तुषारस्य बिन्दय: मौक्तिकवत् शोभन्ते । तुषारस्य एते कणा: सूर्य - किरणानाम् उष्णतां प्राप्य निजम् अस्तित्वम् विनाश्य अस्मभ्यं संसारस्य नश्वरताया: सन्देशं यच्छन्ति । उच्चे आकाशे उत्पतन्त: विहगा: अस्मान् प्रेरयन्ति यत् वयं आलस्यम् अपहाय कर्मशीला: भवेम यत् कर्म एव जीवनम् अस्ति , आलस्यं च मृत्यु: अस्ति । सर्वत: कुसुमानां सुगन्ध: वातावरणं मादकं करोति । एतानि कुसुमानि अस्मान् सन्दिशन्ति यत् अस्माकं जीवनम् अपि संसारोद्याने सौरभेण परिपूर्ण: स्यात् । पुष्पेषु परिभ्रमन्त: भ्रमरा: मनसि हर्षस्य संचारं कुर्वन्ति ।

(1) एकपदेन उत्तरत – $4 \times ½ = 2$

(i) के मनसि हर्षस्य संचारं कुर्वन्ति ?

(ii) केषां सुगन्ध: वातावरणं मादकं करोति ?

(iii) कर्म एव किम् अस्ति ?

(iv) हरित: - घासे तुषारस्य बिन्दव: किंवत् शोभन्ते ?

(2) पूर्णवाक्येन उत्तरत – $2 \times 2 = 4$

(i) आकाशे उत्पतन्त: विहगा: अस्मान् किं प्रेरयन्ति ?

(ii) नष्टा: तुषारकणा: किं सन्दिशन्ति ?

(3) प्रदत्त विकल्पेभ्य: उचितं उत्तरं चित्वा लिखत । $4 \times ½ = 2$

(क) 'भ्रमरा:' इति पदस्य किं विशेषणपदम् अस्ति ?

(i) मनसि (iii) पुष्पेषु

(ii) परिभ्रमन्त: (iv) संचारं

(ख) 'सर्वत: कुसुमानां सुगन्ध:' अत्र अव्ययपदं किम् अस्ति ?

( i ) सुगन्ध: ( iii ) कुसुमानां

( ii ) सर्वत: ( iv ) कुसुम

(ग ) 'रात्रे:' इति पदस्य किम् समानार्थकं पदं प्रयुक्तम् ?

( i ) समय: ( iii ) निशाया:

( ii ) कालिमा ( iv ) आकर्षक:



58

(घ) 'शीतलताम्' इति पदस्य किम् विपरीतार्थकं पदं प्रयुक्तम् ?

(i) कणा: (iii) तुषार:

(ii) उष्मतां (iv) किरणानाम्

(4) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत । 1× 2 = 2

## खण्ड: ख

### रचनात्मक कार्यम् (10 ×½ =5)

2. भवान् सुमन: कानपुरे वसति । भवत: विनीत: परीक्षायाम् असफल: जात: तम् प्रति लिखिते सहानुभूतिपूर्णे पत्रे मञ्जूषात: पदानि चित्वा पुन: लिखत ।

नानकपुरी

( i )————

प्रिय (ii ) ———————— विनीत ।


सप्रेम नमस्ते ।

अधुना एव तव मित्रस्य गौरवस्य पत्रात् तव परीक्षायाम् असफलताया: ( iii ) ———— प्राप्त: । असफलातायां दु:खस्य ( iv ) ——— स्वाभाविकी परम् अस्यां तव कोऽपि दोष: न विद्यते । परीक्षासमीपे तव माता चिकित्सालये आसीत् । तस्या: सेवाया: सम्पूर्ण: भार: तव ( v ) ———— आसीत् । त्वम् रात्रिन्दिवं मातु: सेवां कृत्वा तस्मै जीवनम् अयच्छत् । एतादृश्य: परीक्षा: तु जीवनपर्यन्तम् चलिष्यन्ति , परन्तु प्रणष्टा माता न प्रतिनिवर्तते । मम दृढ़: ( vi ) ——— अस्ति यत् त्वम् अनया (vii ) ———— निराश: न भविष्यसि । साम्प्रतम् अध्ययनं प्रति ( viii ) ———— देहि आगामिन्याम परीक्षायां च शोभनै: ( ix ) ———— उत्तीर्ण: भव । पूज्यपितृभ्यां नम: । अनुजाय सुधीराय स्नेह: ।

तव अभिन्नहृदय मित्रम् ( x ) ————

**मञ्जूषा** – ( सुमन: , स्कन्धयो: , असफलतया , कानपुरत: , मित्र , अनुभूति: , अङ्कै: , ध्यानम् , विश्वास: , समाचार: । )

3. चित्रम् आधृत्य शब्दसूची – सहायतया च संस्कृतेन पञ्चवाक्यानि लिखत । 5× 2 = 10



**मञ्जूषा :** उद्यानस्य , शाटिकायाम् , मातापितरौ , माता , बालकौ , हरितघास: , तिष्ठत: धावत: , कोणे , अस्ति , उपरि ,समीपे , धारयति ।



54

अथवा

मञ्जूषाप्रदत्तशब्दानां सहायतया ' जन्मभूमि: ' विषयम् अधिकृत्य संस्कृते पंचवाक्येषु एकम् अनुच्छेदम् लिखत –

**मञ्जूषा :** जन्मभूमि: , प्रेम , विरा: , जननी , प्रतिदानम् , सर्वत्र , अपेक्षते , रक्षितुम् , स्वर्गात् , गरीयसी ।

**खण्ड :— ग**

अनुप्रयुक्त – व्याकरणम्

4. प्रदत्त विकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत – 2× 1 = 2

( क ) सम्राट् – स् अ ——— र् आ ट्

( i ) म ( ii ) म् (iii ) म्र (iv ) मृ

( ख ) व् इ द् य् आ ल् अ य् अ: ———— ।

( i ) विधालय: (ii ) विद्यालय:

( iii ) विद्यालय (iv) विध्यालय

5.( क ) ' यदि ' शब्दे क: वर्ण: दन्त्य: अस्ति ? 3× 1 = 3

(i ) य् (ii ) द् (iii ) अ ( iv) इ

( ख ) टवर्गस्य उच्चास्थानं किम् अस्ति ?

( i) कण्ठ: ( ii) तालु: (iii )मूर्धा ( iv)दन्ता:

( ग ) ङ् , ञ् , म् वर्णेषु क: वर्ण: नासिक्य: ओष्ठय: च ।

(i) ङ् (ii) ञ् (iii) म् (iv) किमपि न

6.प्रदत्त विकल्पेभ्य: उचितम् उत्तरम् चित्वा सन्धिं सन्धिच्छेदं वा कुरुत 4 × 1 = 4

क .तस्य बालकस्य नाम ज्ञानेन्द्र: अस्ति ।

( i ) ज्ञान + इन्द्र: ( ii ) ज्ञाने + इन्द्र:

(iii ) ज्ञाने + द्र: (iv) ज्ञान + द्र:

( ख ) विद्यार्थीभि: सदैव शब्दार्थ: स्मरणीय: ।

( i ) शब्दा + अर्थ ( ii ) शब्द + अर्थ:

( iii ) शब्द + आर्थ: ( iv ) शब्द + र्थ:

(ग ) ओ३म् जय जगत् + ईश हरे ।

( i ) जगतीश ( ii ) जगदीश



60

( iii ) जागतीश ( iv )जागदीश

( घ ) पयोदानाम् स्थितिरुच्चैः भवति ।

( i ) स्थितिर् + उच्चैः ( ii ) स्थितिः + उच्चैः

( iii ) स्थिति + रुच्चै ( iv ) स्थिति + उच्चै

7. प्रदत्त विकल्पेभ्यः उचितं कारकयुक्तं पदं चित्वा लिखत । 4×1 = 4

( क ) तव ——— कार्यालयः कुत्रास्ति ?

( i ) पिता ( ii ) पितरि

( iii )पितुः ( iv ) पित्रा

( ख ) ——— पुष्पाणि पतन्ति ।

( i ) लता ( ii ) लते

( iii ) लतायाः ( iv ) लताम्

( ग ) तानि पक्वानि ——— आनय ।

( i ) फलम् ( ii ) फले

( iii ) फलानि ( iv ) फल

( घ ) सा ——— माता अस्ति ।

( i ) तस्यः ( ii ) तस्याः

( iii ) तेषाम् ( iv ) तस्मै

8. उपयुक्त – धातुरुपैः रिक्तस्थानानि पूरयत । 4× 1 = 4

( क ) तत्रैव बालिकाः ——— ।

( i ) पठतः ( ii ) पठन्ति

( iii ) पठसि ( iv ) पठतौ

( ख ) ब्राम्हणः श्राद्धार्थम् ——— ।

( i ) अगच्छत् ( ii ) अगच्छन्

( iii ) अगच्छः ( iv ) अगच्छति

( ग ) सेवकाः स्वामिनम् ——— ।

( i ) सेवति ( ii ) सेवसे

( iii ) सेवन्ते ( iv ) सेवते

( घ ) सः पुरस्कारं ——— ।

( i ) लप्स्यते ( ii ) लप्स्येत

( iii ) लप्स्यन्ते ( iv ) लप्स्यसे

9. प्रदत्तविकल्पेभ्यः उचितोत्तरं चित्वा लिखत । 4× 1 = 4

( क ) ——— अभितः पुत्रः क्रीडति ।

( i ) मातुः ( ii ) मातरम्

( iii ) मात्रा ( iv ) माता

( ख ) अहम् ——— सह विद्यालयं गच्छामि ।

( i ) मित्रम् ( ii ) मित्रेण

( iii ) मित्र ( iv ) मित्रा

( ग ) ——— नमः ।

( i ) हरये ( ii ) हरिम्

( iii ) हरिः ( iv ) हरिणा

( घ ) बालकः ——— बिभेति ।

( i ) सिंहात् ( ii ) सिंहस्य

( iii ) सिंहः ( iv ) सिंहम्

10. रेखांकितपदेषु प्रत्ययं प्रयुज्य विभज्य वा लिखत । 4 × 1 = 4

( क ) त्वं भविष्ये किं <u>कर्तुं</u> इच्छसि ?

( i ) कृ + क्त्वा ( ii ) कृ + ल्यप्

( iii ) कृ + तुमुन् ( iv ) कृ + तव्यत्

( ख ) हरिः पितरौ <u>प्र + नम् + ल्यप्</u> पठति ।

( i ) प्रणत्वा ( ii ) प्रनत्वा



62

( iii ) प्रणम्य ( iv ) प्रनम्य

( ग ) अद्भुतं प्रश्नं श्रुत्वा सः पृच्छति ।

( i ) श्रु + कत्वा ( ii ) श्रु + क्त्वा

( iii ) श्रू + त्वा ( iv ) श्रु + त्वम्

( घ ) अधुना त्वं संस्कृतं पठ् + तुमुन् शक्नोषि ।

( i ) पठितु ( ii ) पठतुः

( iii ) पठितूं ( iv ) पठितुम्

## खण्ड : घ

## पठित – अवबोधनम्

11. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत –

न अदेशे , न अकाले , न कुत्सयन् , न प्रतिकूलोपहितम् , न पर्युषितम् अन्नम् खादेत् । न नक्तं दधि भुञ्जीत । न कञ्चिद् अवजानीयात् । न वेगान् धारयेत् । न अहंमानी स्यात् । न अभृतभृत्यो , नैकः सुखि , न सर्वाभिशंकी स्यात् । न नियमं भिन्द्यात् ।

न कार्यकालम् अतिपातयेत् । न अपरीक्षितम् अभिनिविशेत् । न च अतिदीर्घसूत्री स्यात् । न सिद्धौ उत्सेकं गच्छेत् न असिद्धौ दैन्यम् ।

1.एकपदेन उत्तरत । 2 × 1 = 2

(i) किं न अभिनिविशेत् ?

(ii ) कस्याम् उत्सेकं न गच्छेत् ?

2. पूर्णवाक्येन उत्तरत । 1× 2 = 2

( i ) दधि कदा न भुञ्जीत ?

3. भाषिककार्यम् – 4 × ½ = 2

( i ) 'पर्युषितम् अन्नम्' न खादेत् । अत्र विशेषणं पदं किम् अस्ति ?

( क ) पर्युषितम् ( ख ) अन्नम् ( ग ) खादेत्

(ii ) 'अहंकारी' इत्यस्य स्थाने किं पदम् अनुच्छेदे प्रयुक्तम् ?

( क ) अहंमानी ( ख ) सर्वविश्रम्भी ( ग ) अपरीक्षितम्

(iii) 'निन्दयन्' इति पदस्य समानार्थकं पदं लिखत ।

( क ) कुत्सयन् ( ख ) अहंमानी ( ग ) उत्सेकं

(iv) 'प्रभातम्' इति पदस्य विपरीतभावात्मकं पदं चित्वा लिखत ।



63

( क ) पर्युषितम्        ( ख ) नक्तम्        ( ग ) कार्यकालम्

12. अधोलिखितम् श्लोकं पठित्वा प्रश्नान् उत्तरत ।

गौरवं प्राप्यते दानात् न तु वित्तस्य सञ्चयात् ।
स्थितिरुच्चैः पयोदानां पयोधीनामधः स्थितिः ।।

1. एकपदेन उत्तरत ।    $2 \times 1 = 2$

(i) गौरवं कस्मात् प्राप्यते ?

(ii) वित्तस्य सञ्चयात् किं न प्राप्यते ?

2. पूर्णवाक्येन उत्तरत ।    $1 \times 2 = 2$

(i) केषां स्थितिः उच्चैः ?

3. भाषिककार्यम् ।    $4 \times ½ = 2$

(i) श्लोके अधः पदस्य कः विपर्ययः प्रयुक्तः ?

( क ) उपरि        ( ख ) उच्चैः        ( ग ) स्थितिः

(ii) श्लोके प्रयुक्तम् क्रियापदं किम् अस्ति ? विकल्पेभ्यः चित्वा लिखत ।

( क ) अधः        ( ख ) उच्चैः        ( ग ) प्राप्यते

(iii ) 'सञ्चयात्' अत्र कः विभक्तिः प्रयुक्ता ?

( क ) तृतीया        ( ख ) पञ्चमी        ( ग ) षष्ठी

(iv ) 'वित्तम्' इत्यस्य पदस्य अर्थं किम् ?

( क ) धनम्        ( ख ) गौरवं        ( ग ) दानम्

13. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत ।

रामः — मे शापितो न परिरक्षसि चेत् स्वराज्यम् ।

भरतः — हन्त! अनुत्तरम् अभिहितम् । भवतु , समयतः ते राज्यं परिपालयामि ।

भरतः — मम हस्ते निक्षिप्तं तव राज्यं चतुर्दशवर्षान्ते प्रतिग्रहीतुम् इच्छामि ।

रामः — एवमस्तु ।

भरतः — आर्य ! अन्यमपि वरं हर्तुम् इच्छामि ।

रामः — वत्स ! किमिच्छसि ? किमहं ददामि ? किम् अहम् अनुष्ठास्यामि ?



64

1. एकपदेन उत्तरत । $2 \times 1 = 2$

(i) समयत: क: राज्यम् परिपालयति ?

(ii) अनुत्तर: क: अभवत् ?

2. पूर्णवाक्येन उत्तरत । $1 \times 2 = 2$

(i) भरतस्य समय: क: आसीत् ?

3. निर्देशानुसारम् उत्तरत । $4 \times ½ = 2$

(i) 'ग्रहीतुम्' इति पदस्य किं विलोमपदम् अत्र अस्ति ?

(क) निक्षिप्तम् (ख) अभिहितम् (ग) प्रतिग्रहीतुम्

(ii) समयत: ते राज्यम् परिपालयामि । अत्र ते पदं कस्मै आगतम् ।

(क) भरताय (ख) रामाय (ग) सुमन्त्राय

(iii) 'इच्छामि' अस्य पदस्य कर्तृपदं किम् ?

(क) मम (ख) तव (ग) अहम् (भरत:)

(iv) 'शापम्' इत्यस्य पदस्य क: विपर्यय: अत्र नाट्यांशे प्रयुक्त: ?

(क) सुखम् (ख) वरम् (ग) एवम्

14. रेखांकितानि पदानि आधृत्य प्रश्ननिर्माणं कृत्वा लिखत । $4 \times 1 = 4$

(i) नकुल: <u>रक्तविलिप्तमुखपाद:</u> आसीत् ।

(क) क: (ख) कीदृश: (ग) किम् (घ) कम्

(ii) एवंभूतं पुत्रं दृष्ट्वा <u>पिता</u> उवाच ।

(क) किम् (ख) कम् (ग) क: (घ) केन

(iii) <u>सर्वस्य</u> लोचनं शास्त्रम् अस्ति ।

(क) कस्य (ख) कस्या (ग) कम् (घ) किम्

(iv) कृष्णसर्प: <u>नकुलेन</u> दृष्ट: ।

(क) कम् (ख) कस्य (ग) केन (घ) क:

15. अधोलिखितस्य श्लोकद्वयस्य उचितपदै: अन्वयं पूरयत । $4 \times ½ = 2$

(क) कीटोऽपि सुमन: संगादारोहति सतां शिर: ।
अश्मापि याति देवत्वं महद्भि: सुप्रतिष्ठित: ।।



65